# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – १** | **प्रश्नपत्रम् – ५** | **गुणाः – ५०** |
| **विषयः – वेदः** | **सत्रम् – २** | **समयः – २ तः ४** |
| **दिनाङ्कः – १७/०७/२०२१** | **सन्दर्भग्रन्थः – वैदिकसूक्तानि** | |

सूचना - **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः मन्त्रयोः व्याख्या कार्या ।**

१ इहैवाभि ति तनूभे आर्त्नी इव ज्यया ।
वाचस्पतिर्नि यच्छतु मय्येवास्तु मयि श्रुतम् ॥

२ सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथिवीं पालयन्ति ।
सा नो भूतस्य भव्यस्य पत्न्युरुं लोकं पृथिवी नः कृणोतु ॥

३ विश्वम्भरा वसुधानी प्रतिष्ठा हिरण्यवक्षा जगतो निवेशनी ।
वैश्वानरं बिभ्रती भूमिरग्निमिन्द्र ऋषभा द्रविणो नो दधातु ॥

४ ये त्रिषप्ताः परियन्ति विश्वा रूपाणि बिभ्रतः ।
वाचस्पतिर्बला तेषां तन्वोऽद्य तधातु मे ॥

**प्रश्नः २** पृथिवीसूक्तस्याधारेण पर्यावरणचिन्तनं कुरुत ।

**प्रश्नः ३** मेधाजननोपायाः यथाशास्त्रं प्रतिपादनीयाः ।

**प्रश्नः ४** कालसूक्तस्य महत्त्वं निरूपयत ।

**प्रश्नः ५** आधुनिकसमाजे गोसूक्तस्योपादेयता विद्यते न वा इति विवेचयत ।

**प्रश्नः ६ अधोलिखितेषु द्वयोः मन्त्रयोः व्याख्या कार्या ।**

१ उच्छिष्टे द्यावापृथिवी विश्वं भूतं समाहितम् ।
आपः समुद्र उच्छिष्टे चन्द्रमा वात आहितः ॥

२ आ गावो अग्मन्नुत भद्रमक्रन्त्सीदन्तु गोष्ठे रणयन्त्यस्मै ।
प्रजावतीः पुरुरूपा इह स्युरिन्द्राय पूर्वीरुषसो दुहानाः ॥

३ विद्म ते सभे नाम नरिष्टा नाम वा असि ।
ये ते के च सभासदस्ते मे सन्तु सवाचसः ॥

४ अचिक्रदद् वृषा हरिर्महान् मित्रो न दर्शतः ।
सं सूर्येण दिद्युते ॥

**प्रश्नः ७** सामवेदस्य महत्त्वं प्रतिपादयत ।

**प्रश्नः ८** सोमसूक्ताधारेण सोमस्य वैशिष्ट्यं महत्त्वं च वर्णयत ।

**प्रश्नः ९** वैदिकच्छन्दसां विषये एकं निबन्धं लिखत ।

**प्रश्नः १०** वैदिकदेवेषु कस्यचिदेकस्य देवस्य वर्णनं कुरुत ।

**प्रश्नः ११** **दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ अथर्ववेदस्य प्रथमसूक्तस्य नाम किमस्ति ?
२ पृथिवीसूक्तस्यापरं नाम किमस्ति ?
३ कालसूक्ते 'अश्व' इति शब्दस्य कोऽर्थः ?
४ अग्निः कस्य लोकस्य देवः ?
५ ऋग्वेदस्य सप्तममण्डलस्य द्रष्टा ऋषिः कः ?
६ के प्रजापतेः दुहितरौ ?
७ सामवेदस्य मुख्यप्रतिपाद्यविषयः कः ?
८ 'अनुष्टुप्' छन्दसः किमस्ति स्वरूपम् ?
९ जगतीछन्दसः एकस्मिन् पादे कत्यक्षराणि सन्ति ?
१० अथर्ववेदे कति काण्डानि सन्ति ?
११ यजुर्वेदानुसारं कति वैदिकदेवताः ?
१२ पर्जन्यः कस्य लोकस्य देवः ?
१३ 'माता भूमिः पुत्रो अहं पृथिव्याः' इति मन्त्रांशः कुत्र श्रूयते ?
१४ मेधाजननसूक्यस्य का देवता ?
१५ 'ऋतम्' इति शब्दस्य कोऽर्थः ?

****